# Vedantasara

# વેદાન્તસાર

## Document Information

Text title : Vedantasara

File name : vedantasara.itx

Category : major_works

Location : doc_z_misc_major_works

Author : Sadananda Yogindra (circa 15th cent.)

Transliterated by : Sunder Hattangadi,

Proofread by : sunder Hattangadi Pranipata Chaitanya pranipatachaitanya at yahoo.co.in

Translated by : -

Description-comments : Basics of Vedanta Philosophy

Latest update : May 11, 2003, September 30, 2012, February 7, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# વેદાન્તસાર

અખણ્ડં સચ્ચિદાનન્દમવાઙ્મનસગોચરમ્ ।
આત્માનમખિલાધારમાશ્રયેઽભીષ્ટસિદ્ધયે ॥ ૧॥

અર્થતોઽપ્યદ્વયાનન્દાનતીતદ્વૈતભાનતઃ ।
ગુરૂનારાધ્ય વેદાન્તસારં વક્ષ્યે યથામતિ ॥ ૨॥

વેદાન્તો નામોપનિષત્પ્રમાણં તદુપકારીણિ
શારીરકસૂત્રાદીનિ ચ ॥ ૩॥

અસ્ય વેદાન્તપ્રકરણત્વાત્ તદીયૈઃ એવ અનુબન્ધૈઃ
તદ્વત્તાસિદ્ધેઃ ન તે પૃથગાલોચનીયાઃ ॥ ૪॥

તત્ર અનુબન્ધો નામ અધિકારિવિષયસમ્બન્ધપ્રયોજનાનિ ॥ ૫॥

અધિકારી તુ વિધિવદધીતવેદવેદાઙ્ગત્વેનાપાતતોઽધિગતાખિલ-
વેદાર્થોઽસ્મિન્ જન્મનિ જન્માન્તરે વા કામ્યનિષિદ્ધવર્જનપુરઃસરં
નિત્યનૈમિત્તિકપ્રાયશ્ચિત્તોપાસનાનુષ્ઠાનેન નિર્ગતનિખિલકલ્મષતયા
નિતાન્તનિર્મલસ્વાન્તઃ સાધનચતુષ્ટયસમ્પન્નઃ પ્રમાતા ॥ ૬॥

કામ્યાનિ - સ્વર્ગાદીષ્ટસાધનાનિ જ્યોતિષ્ટોમાદીનિ ॥ ૭॥

નિષિદ્ધાનિ - નરકાદ્યનિષ્ટસાધનાનિ બ્રાહ્મણહનનાદીનિ ॥ ૮॥

નિત્યાનિ - અકરણે પ્રત્યવાયસાધનાનિ સન્ધ્યાવન્દનાદીનિ ॥ ૯॥

નૈમિત્તિકાનિ - પુત્રજન્માદ્યનુબન્ધીનિ જાતેષ્ટ્યાદીનિ ॥ ૧૦॥

પ્રાયશ્ચિત્તાનિ - પાપક્ષયસાધનાનિ ચાન્દ્રાયણાદીનિ ॥ ૧૧॥

ઉપાસનાનિ - સગુણબ્રહ્મવિષયમાનસવ્યાપારરૂપાણિ
શાણ્ડિલ્યવિદ્યાદીનિ ॥ ૧૨॥

એતેષાં નિત્યાદીનાં બુદ્ધિશુદ્ધિઃ પરં પ્રયોજનમુપાસનાનાં

તુ ચિત્તૈકાગ્ર્યં “તમેતમાત્માનં વેદાનુવચનેન બ્રાહ્મણા
વિવિદિષન્તિ યજ્ઞેન” (બૃ ઉ ૪.૪.૨૨] ઇત્યાદિ શ્રુતેઃ
“તપસા કલ્મષં હન્તિ” (મનુ ૧૨ - ૧૦૪]
ઇત્યાદિ સ્મૃતેશ્ચ ॥ ૧૩ ॥

નિત્યનૈમિત્તિકયોઃ ઉપાસનાનાં ત્વવાન્તરફલં
પિતૃલોકસત્યલોકપ્રાપ્તિઃ
“કર્મણા પિતૃલોકઃ વિદ્યયા દેવલોકઃ” (બૃ ઉ ૧-૫-૧૬]
ઇત્યાદિશ્રુતેઃ ॥ ૧૪ ॥

સાધનાનિ - નિત્યાનિત્યવસ્તુવિવેકેહામુત્રાર્થફલભોગવિરાગ-
શમાદિષટ્કસમ્પત્તિમુમુક્ષુત્વાનિ ॥ ૧૫ ॥

નિત્યાનિત્યવસ્તુવિવેકસ્તાવદ્ બ્રહ્મૈવ નિત્યં વસ્તુ
તતોઽન્યદખિલમનિત્યમિતિ વિવેચનમ્ ॥ ૧૬ ॥

ઐહિકાનાં સ્રક્ચન્દનવનિતાદિવિષયભોગાનાં
કર્મજન્યતયાનિત્યત્વવદામુષ્મિકાણામપ્યમૃતાદિ-
વિષયભોગાનામનિત્યતયા તેભ્યો નિતરાં વિરતિઃ -
ઇહામુત્રાર્થફલભોગવિરાગઃ ॥ ૧૭ ॥

શમાદયસ્તુ - શમદમોપરતિતિતિક્ષાસમાધાનશ્રદ્ધાખ્યાઃ ॥ ૧૮ ॥

શમસ્તાવત્ - શ્રવણાદિવ્યતિરિક્તવિષયેભ્યો મનસો નિગ્રહઃ ॥ ૧૯ ॥

દમઃ - બાહ્યેન્દ્રિયાણાં તદ્વ્યતિરિક્તવિષયેભ્યો નિવર્તનમ્ ॥ ૨૦ ॥

નિવર્તિતાનામેતેષાં તદ્વ્યતિરિક્તવિષયેભ્ય ઉપરમણમુપરતિરથવા
વિહિતાનાં કર્મણાં વિધિના પરિત્યાગઃ ॥ ૨૧ ॥

તિતિક્ષા - શીતોષ્ણાદિદ્વન્દ્વસહિષ્ણુતા ॥ ૨૨ ॥

નિગૃહીતસ્ય મનસઃ શ્રવણાદૌ તદનુગુણવિષયે ચ
સમાધિઃ - સમાધાનમ્ ॥ ૨૩ ॥

ગુરૂપદિષ્ટવેદાન્તવાક્યેષુ વિશ્વાસઃ - શ્રદ્ધા ॥ ૨૪ ॥

મુમુક્ષુત્વમ્ - મોક્ષેચ્છા ॥ ૨૫ ॥

એવમ્ભૂતઃ પ્રમાતાધિકારી “શાન્તો દાન્તઃ”
(બૃ ઉ ૪.૪.૨૩) ઇત્યાદિશ્રુતેઃ । ઉક્તઞ્ચ -

“પ્રશાન્તચિત્તાય જિતેન્દ્રિયાય ચ
    પ્રહીણદોષાય યથોક્તકારિણે ।
ગુણાન્વિતાયાનુગતાય સર્વદા
    પ્રદેયમેતત્ સતતં મુમુક્ષવે ॥ ૨૬॥”
        (ઉપદેશસાહસ્રી ૩૨૪.૧૬.૭૨)
વિષયઃ - જીવબ્રહ્મૈક્યં શુદ્ધચૈતન્યં પ્રમેયં
તત્ર એવ વેદાન્તાનાં તાત્પર્યાત્ ॥ ૨૭॥

સમ્બન્ધસ્તુ - તદૈક્યપ્રમેયસ્ય તત્પ્રતિપાદકોપનિષત્પ્રમાણસ્ય
ચ બોધ્યબોધકભાવઃ ॥ ૨૮॥

પ્રયોજનં તુ - તદૈક્યપ્રમેયગતાજ્ઞાનનિવૃત્તિઃ
સ્વસ્વરૂપાનન્દાવાપ્તિશ્ચ “તરતિ શોકમ્ આત્મવિત્
                (છાં ઉ ૭.૧.૩)
ઇત્યાદિશ્રુતેઃ” બ્રહ્મવિદ્ બ્રહ્મૈવ ભવતિ “
                (મુણ્ડ ઉ  ૩.૨.૯)
ઇત્યાદિશ્રુતેશ્ચ ॥ ૨૯॥

અયમધિકારી જનનમરણાદિસંસારાનલસન્તપ્તો દીપ્તશિરા
જલરાશિમિવોપહારપાણિઃ શ્રોત્રિયં બ્રહ્મનિષ્ઠં ગુરુમુપસૃત્ય
તમનુસરતિ “તદ્વિજ્ઞાનાર્થં સ ગુરુમેવાભિગચ્છેત્ સમિત્પાણિઃ
શ્રોત્રિયં બ્રહ્મનિષ્ઠમ્” (મુણ્ડ ઉ ૧.૨.૧૨)
ઇત્યાદિશ્રુતેઃ ॥ ૩૦॥

સ ગુરુઃ પરમકૃપયાધ્યારોપાપવાદન્યાયેનૈનમુપદિશતિ
“તસ્મૈ સ વિદ્વાનુપસન્નાય સમ્યક્
    પ્રશાન્તચિત્તાય શમાન્વિતાય ।
યેનાક્ષરં પુરુષં વેદ સત્યં
    પ્રોવાચ તાં તત્ત્વતો બ્રહ્મવિદ્યામ્ ॥”
        (મુણ્ડ ઉ ૧.૨.૧૩)
ઇત્યાદિશ્રુતેઃ ॥ ૩૧॥

૨
અસર્પભૂતાયાં રજ્જૌ સર્પારોપવત્ વસ્તુનિ અવસ્ત્વારોપઃ - અધ્યારોપઃ ॥ ૩૨॥

વસ્તુ - સચ્ચિદાનન્દમદ્વયં બ્રહ્મ અજ્ઞાનાદિસકલજડસમૂહોઽવસ્તુ ॥ ૩૩॥

અજ્ઞાનં તુ - સદસદ્ભ્યામનિર્વચનીયં ત્રિગુણાત્મકં જ્ઞાનવિરોધિ
ભાવરૂપં યત્કિઞ્ચિદિતિ વદન્ત્યહમજ્ઞ ઇત્યાદ્યનુભવાત્ "દેવાત્મશક્તિં
સ્વગુણૈર્નિગૂઢામ્" (શ્વેત ઉ ૧.૩) ઇત્યાદિશ્રુતેશ્ચ ॥ ૩૪॥

ઇદમજ્ઞાનં સમષ્ટિવ્યષ્ટ્યભિપ્રાયેણૈકમનેકમિતિ ચ વ્યવહ્રિયતે ॥ ૩૫॥

તથાહિ યથા વૃક્ષાણાં સમષ્ટ્યભિપ્રાયેણ વનમિત્યેકત્વવ્યપદેશો
યથા વા જલાનાં સમષ્ટ્યભિપ્રાયેણ જલાશય ઇતિ તથા નાનાત્વેન
પ્રતિભાસમાનાનાં જીવગતાજ્ઞાનાનાં સમષ્ટ્યભિપ્રાયેણ તદેકત્વવ્યપદેશઃ
"અજામેકાં" (શ્વે ઉ ૪.૫) ઇત્યાદિશ્રુતેઃ ॥ ૩૬॥

ઇયં સમષ્ટિરુત્કૃષ્ટોપાધિતયા વિશુદ્ધસત્ત્વપ્રધાના ॥ ૩૭॥

એતદુપહિતં ચૈતન્યં સર્વજ્ઞત્વસર્વેશ્વરત્વસર્વનિયન્તૃત્વાદિગુણકમવ્યક્તમન્તર્યામી
જગત્કારણમીશ્વર ઇતિ ચ વ્યપદિશ્યતે સકલાજ્ઞાનાવભાસકત્વાત્ ।
"યઃ સર્વજ્ઞઃ સર્વવિત્" (મુણ્ડ ઉ ૧.૧.૯) ઇતિ શ્રુતેઃ ॥ ૩૮॥

ઈશ્વરસ્યેયં સમષ્ટિરખિલકારણત્વાત્કારણશરીરમાનન્દપ્રચુરત્વા-
ત્કોશવદાચ્છાદકત્વાચ્ચાનન્દમયકોશઃ સર્વોપરમત્વા-
ત્સુષુપ્તિરત એવ સ્થૂલસૂક્ષ્મપ્રપઞ્ચલયસ્થાનમિતિ ચ ઉચ્યતે ॥ ૩૯॥

યથા વનસ્ય વ્યષ્ટ્યભિપ્રાયેણ વૃક્ષા ઇત્યનેકત્વવ્યપદેશો યથા વા જલાશયસ્ય
વ્યષ્ટ્યભિપ્રાયેણ જલાનીતિ તથાજ્ઞાનસ્ય વ્યષ્ટ્યભિપ્રાયેણ
તદનેકત્વવ્યપદેશઃ "ઇન્દ્રો માયાભિઃ પુરુરૂપ ઈયતે" (ઋગ્વેદ ૬.૪૭.૧૮)
ઇત્યાદિશ્રુતેઃ ॥ ૪૦॥

અત્ર વ્યસ્તસમસ્તવ્યાપિત્વેન વ્યષ્ટિસમષ્ટિતાવ્યપદેશઃ ॥ ૪૧॥

ઇયં વ્યષ્ટિર્નિકૃષ્ટોપાધિતયા મલિનસત્ત્વપ્રધાના ॥ ૪૨॥

એતદુપહિતં ચૈતન્યમલ્પજ્ઞત્વાનીશ્વરત્વાદિગુણકં પ્રાજ્ઞ
ઇત્યુચ્યત એકાજ્ઞાનાવભાસકત્વાત્ ॥ ૪૩॥

અસ્ય પ્રાજ્ઞત્વમસ્પષ્ટોપાધિતયાનતિપ્રકાશકત્વાત્ ॥ ૪૪॥

અસ્યાપીયમહઙ્કારાદિકારણત્વાત્કારણશરીરમાનન્દ-
પ્રચુરત્વાત્કોશવદાચ્છાદકત્વાચ્ચાનન્દમયકોશઃ
સર્વોપરમત્વાત્સુષુપ્તિરત એવ સ્થૂલસૂક્ષ્મશરીરપ્રપઞ્ચ-

લયસ્થાનમિતિ ચ ઉચ્યતે ॥ ૪૫॥

તદાનીમેતાવીશ્વરપ્રાજ્ઞૌ ચૈતન્યપ્રદીપ્તાભિરતિસૂક્ષ્માભિ-
રજ્ઞાનવૃત્તિભિરાનન્દમનુભવતઃ "આનન્દભુક્ ચેતોમુખઃ
પ્રાજ્ઞઃ" (માણ્ડૂ ઉ ૫) ઇતિ શ્રુતેઃ સુખમહમવાપ્સમ્
ન કિઞ્ચિદવેદિષમિત્યુત્થિતસ્યપરામર્શોપપત્તેશ્ચ ॥ ૪૬॥

અનયોઃ સમષ્ટિવ્યષ્ટ્યોર્વનવૃક્ષયોરિવ જલાશય-જલયોરિવ વાભેદઃ ॥ ૪૭॥

એતદુપહિતયોરીશ્વરપ્રાજ્ઞયોરપિ વનવૃક્ષાવચ્છિન્નાકાશયોરિવ
જલાશયજલગતપ્રતિબિમ્બાકાશયોરિવ વાભેદઃ "એષ સર્વેશ્વર
(એષ સર્વજ્ઞ એષોઽન્તર્યામ્યેષ યોનિઃ સર્વસ્ય પ્રભવાપ્યયૌ હિ
ભૂતાનામ્)" (માણ્ડૂ ઉ ૬) ઇત્યાદિ શ્રુતેઃ ॥ ૪૮॥

વનવૃક્ષતદવચ્છિન્નાકાશયોર્જલાશયજલતદ્ગતપ્રતિબિમ્બાકાશયો-
ર્વાધારભૂતાનુપહિતાકાશવદનયોરજ્ઞાનતદુપહિતચૈતન્યયો-
રાધારભૂતં યદનુપહિતં ચૈતન્યં તત્તુરીયમિત્યુચ્યતે
"શાન્તં શિવમદ્વૈતં ચતુર્થં મન્યન્તે (સ આત્મા સ વિજ્ઞેયઃ)"
(માણ્ડૂ ઉ ૭) ઇત્યાદિશ્રુતેઃ ॥ ૪૯॥

ઇદમેવ તુરીયં શુદ્ધચૈતન્યમજ્ઞાનાદિતદુપહિતચૈતન્યાભ્યાં તપ્તાયઃ
પિણ્ડવદવિવિક્તં સન્મહાવાક્યસ્ય વાચ્યં વિવિક્તં સલ્લક્ષ્યમિતિ ચોચ્યતે ॥ ૫૦॥

અસ્યાજ્ઞાનસ્યાવરણવિક્ષેપનામકમસ્તિ શક્તિદ્વયમ્ ॥ ૫૧॥

આવરણશક્તિસ્તાવદલ્પોઽપિ મેઘોઽનેકયોજનાયતમાદિત્ય-
મણ્ડલમવલોકયિતૃનયનપથપિધાયકતયા યથાચ્છાદયતીવ
તથાજ્ઞાનં પરિચ્છિન્નમપ્યાત્માનમપરિચ્છિન્નમસંસારિણ-
મવલોકયિતૃબુદ્ધિપિધાયકતયાચ્છાદયતીવ તાદૃશં સામર્થ્યમ્ ।
તદુક્તં - "ઘનચ્છન્નદૃષ્ટિર્ઘનચ્છન્નમર્કં યથા
મન્યતે નિષ્પ્રભં ચાતિમૂઢઃ । તથા બદ્ધવદ્ભાતિ યો મૂઢદૃષ્ટેઃ
સ નિત્યોપલબ્ધિસ્વરૂપોઽહમાત્મા ॥" ઇતિ (હસ્તામલકમ્ ૧૦) ॥ ૫૨॥

અનયા આવૃતસ્યાત્મનઃ કર્તૃત્વભોક્તૃત્વસુખિત્વદુઃખિત્વાદિસંસારસમ્ભાવનાપિ
ભવતિ યથા સ્વાજ્ઞાનેનાવૃતાયાં રજ્જ્વાં સર્પત્વસમ્ભાવના ॥ ૫૩॥

વિક્ષેપશક્તિસ્તુ યથા રજ્જ્વજ્ઞાનં સ્વાવૃત રજ્જૌ સ્વશક્ત્યા
સર્પાદિકમુદ્ભાવયત્યેવમજ્ઞાનમપિ સ્વાવૃતાત્મનિ

સ્વશક્ત્યાऽऽકાશાદિપ્રપઞ્ચમુદ્ભાવયતિ
તાદૃશં સામર્થ્યમ્ । તદુક્તમ્ - “વિક્ષેપશક્તિર્લિઙ્ગાદિ બ્રહ્માણ્ડાન્તં
જગત્ સૃજેત્” ઇતિ । (વાક્યસુધા ૧૩) ॥ ૫૪॥

શક્તિદ્વયવદજ્ઞાનોપહિતં ચૈતન્યં સ્વપ્રધાનતયા નિમિત્તં
સ્વોપાધિપ્રધાનતયોપાદાનં ચ ભવતિ ॥ ૫૫॥

યથા લૂતા તન્તુકાર્યં પ્રતિ સ્વપ્રધાનતયા નિમિત્તં
સ્વશરીરપ્રધાનતયોપાદાનઞ્ચ ભવતિ ॥ ૫૬॥

તમઃપ્રધાનવિક્ષીપશક્તિમદજ્ઞાનોપહિતચૈતન્યાદાકાશ
આકાશાદ્વાયુર્વાયોરગ્નિરગ્નેરાપોઽદ્ભ્યઃ પૃથિવી
ચોત્પદ્યતે “એતસ્માદાત્મન આકાશઃ સમ્ભૂતઃ”
(તૈ ઉ ૨.૧.૧) ઇત્યાદિશ્રુતેઃ ॥ ૫૭॥

તેષુ જાડ્યાધિક્યદર્શનાત્તમઃપ્રાધાન્યં તત્કારણસ્ય ।
તદાનીં સત્ત્વરજસ્તમાંસિ કારણગુણપ્રક્રમેણ
તેષ્વાકાશાદિષૂત્પદ્યન્તે ॥ ૫૮॥

એતાન્યેવ સૂક્ષ્મભૂતાનિ તન્માત્રાણ્યપઞ્ચીકૃતાનિ ચોચ્યન્તે ॥ ૫૯॥

એતેભ્યઃ સૂક્ષ્મશરીરાણિ સ્થૂલભૂતાનિ ચોત્પદ્યન્તે ॥ ૬૦॥

સૂક્ષ્મશરીરાણિ સપ્તદશાવયવાનિ લિઙ્ગશરીરાણિ ॥ ૬૧॥

અવયવાસ્તુ જ્ઞાનેન્દ્રિયપઞ્ચકં બુદ્ધિમનસી કર્મેન્દ્રિયપઞ્ચકં
વાયુપઞ્ચકં ચેતિ ॥ ૬૨॥

જ્ઞાનેન્દ્રિયાણિ શ્રોત્રત્વક્ચક્ષુર્જિહ્વાઘ્રાણાખ્યાનિ ॥ ૬૩॥

એતાન્યાકાશાદીનાં સાત્ત્વિકાંશેભ્યો વ્યસ્તેભ્યઃ
પૃથક્ પૃથક્ ક્રમેણોત્પદ્યન્તે ॥ ૬૪॥

બુદ્ધિર્નામ નિશ્ચયાત્મિકાન્તઃકરણવૃત્તિઃ ॥ ૬૫॥

મનો નામ સઙ્કલ્પવિકલ્પાત્મિકાન્તઃકરણવૃત્તિઃ ॥ ૬૬॥

અનયોરેવ ચિત્તાહઙ્કારયોરન્તર્ભાવઃ ॥ ૬૭॥

અનુસન્ધાનાત્મિકાન્તઃકરણવૃત્તિઃ ચિત્તમ્ ॥ ૬૮॥

અભિમાનાત્મિકાન્તઃકરણવૃત્તિઃ અહઙ્કારઃ ॥ ૬૯॥

એતે પુનરાકાશાદિગતસાત્ત્વિકાંશેભ્યો મિલિતેભ્ય ઉત્પદ્યન્તે ॥ ૭૦॥

એતેષાં પ્રકાશાત્મકત્વાત્સાત્ત્વિકાંશકાર્યત્વમ્ ॥ ૭૧॥

ઇયં બુદ્ધિર્જ્ઞાનેન્દ્રિયૈઃ સહિતા વિજ્ઞાનમયકોશો ભવતિ ॥ ૭૨॥

અયં કર્તૃત્વભોક્તૃત્વસુખિત્વદુઃખિત્વાદ્યભિમાનત્વેનેહલોકપરલોકગામી
વ્યવહારિકો જીવ ઇત્યુચ્યતે ॥ ૭૩॥

મનસ્તુ જ્ઞાનેન્દ્રિયૈઃ સહિતં સન્મનોમયકોશો ભવતિ ॥ ૭૪॥

કર્મેન્દ્રિયાણિ વાક્પાણિપાદપાયૂપસ્થાખ્યાનિ ॥ ૭૫॥

એતાનિ પુનરાકાશાદીનાં રજોંશેભ્યો વ્યસ્તેભ્યઃ પૃથક્ પૃથક્
ક્રમેણોત્પદ્યન્તે ॥ ૭૬॥

વાયવઃ પ્રાણાપાનવ્યાનોદાનસમાનાઃ ॥ ૭૭॥

પ્રાણો નામ પ્રાગ્ગમનવાન્નાસાગ્રસ્થાનવર્તી ॥ ૭૮॥

અપાનો નામાવાગ્ગમનવાન્પાય્વાદિસ્થાનવર્તી ॥ ૭૯॥

વ્યાનો નામ વિષ્વગ્ગમનવાનખિલશરીરવર્તી ॥ ૮૦॥

ઉદાનો નામ કણ્ઠસ્થાનીય ઊર્ધ્વગમનવાનુત્ક્રમણવાયુઃ ॥ ૮૧॥

સમાનો નામ શરીરમધ્યગતાશિતપીતાન્નાદિસમીકરણકરઃ ॥ ૮૨॥

સમીકરણન્તુ પરિપાકકરણં રસરુધિરશુક્રપુરીષાદિકરણમિતિ યાવત્ ॥ ૮૩॥

કેચિત્તુ નાગકૂર્મકૃકલદેવદત્તધનઞ્જયાખ્યાઃ પઞ્ચાન્યે
વાયવઃ સન્તીતિ વદન્તિ ॥ ૮૪॥

તત્ર નાગ ઉદ્ગિરણકરઃ । કૂર્મ ઉન્મીલનકરઃ । કૃકલઃ ક્ષુત્કરઃ ।
દેવદત્તો જૃમ્ભણકરઃ । ધનઞ્જયઃ પોષણકરઃ ॥ ૮૫॥

એતેષાં પ્રાણાદિષ્વન્તર્ભાવાત્પ્રાણાદયઃ પઞ્ચૈવેતિ કેચિત્ ॥ ૮૬॥

એતત્પ્રાણાદિપઞ્ચકમાકાશાદિગતરજોંશેભ્યોમિલિતેભ્ય ઉત્પદ્યતે ॥ ૮૭॥

ઇદં પ્રાણાદિપઞ્ચકં કર્મેન્દ્રિયૈઃ સહિતં સત્પ્રાણમયકોશો ભવતિ ।
અસ્ય ક્રિયાત્મકત્વેન રજોંશકાર્યત્વમ્ ॥ ૮૮॥

એતેષુ કોશેષુ મધ્યે વિજ્ઞાનમયો જ્ઞાનશક્તિમાન્ કર્તૃરૂપઃ ।
મનોમય ઇચ્છાશક્તિમાન્ કરણરૂપઃ ।

પ્રાણમયઃ ક્રિયાશક્તિમાન્ કાર્યરૂપઃ ।
યોગ્યત્વાદેવમેતેષાં વિભાગ ઇતિ વર્ણયન્તિ ।
એતત્કોશત્રયં મિલિતં સત્સૂક્ષ્મશરીરમિત્યુચ્યતે ॥ ૮૯॥

અત્રાપ્યખિલસૂક્ષ્મશરીરમેકબુદ્ધિવિષયતયા વનવજ્જલાશયવદ્વા
સમષ્ટિરનેકબુદ્ધિવિષયતયા વૃક્ષવજ્જલવદ્વા વ્યષ્ટિરપિ ભવતિ ॥ ૯૦॥

એતત્સમષ્ટ્યુપહિતં ચૈતન્યં સૂત્રાત્મા હિરણ્યગર્ભઃ પ્રાણશ્ચેત્યુચ્યતે
સર્વત્રાનુસ્યૂતત્વાજ્જ્ઞાનેચ્છાક્રિયાશક્તિમદુપહિતત્વાચ્ચ ॥ ૯૧॥

અસ્યૈષા સમષ્ટિઃ સ્થૂલપ્રપઞ્ચાપેક્ષયા સૂક્ષ્મત્વાત્સૂક્ષ્મશરીરં
વિજ્ઞાનમયાદિકોશત્રયં જાગ્રદ્વાસનામયત્વાત્સ્વપ્નોઽતએવ
સ્થૂલપ્રપઞ્ચલયસ્થાનમિતિ ચોચ્યતે ॥ ૯૨॥

એતદ્વ્યષ્ટ્યુપહિતં ચૈતન્યં તૈજસો ભવતિ તેજોમયાન્તઃકરણોપહિતત્વાત્ ॥ ૯૩॥

અસ્યાપીયં વ્યષ્ટિઃ સ્થૂલશરીરાપેક્ષયા સૂક્ષ્મત્વાદિતિ હેતોરેવ
સૂક્ષ્મશરીરં વિજ્ઞાનમયાદિકોશત્રયં જાગ્રદ્વાસનામયત્વાત્સ્વપ્નોઽતએવ
સ્થૂલશરીરલયસ્થાનમિતિ ચોચ્યતે ॥ ૯૪॥

એતૌ સૂત્રાત્મતૈજસૌ તદાનીં મનોવૃત્તિભિઃ સૂક્ષ્મવિષયાનનુભવતઃ
"પ્રવિવિક્તભુક્તૈજસઃ" (માણ્ડૂ ઉ ૩) ઇત્યદિશ્રુતેઃ ॥ ૯૫॥

અત્રાપિ સમષ્ટિવ્યષ્ટ્યોસ્તદુપહિતસૂત્રાત્મતૈજસયોર્વનવૃક્ષવત્તદવ-
ચ્છિન્નાકાશવચ્ચ જલાશયજલવત્તદ્ગતપ્રતિબિમ્બાકાશવચ્ચાભેદઃ ॥ ૯૬॥

એવં સૂક્ષ્મશરીરોત્પત્તિઃ ॥ ૯૭॥

સ્થૂલભૂતાનિ તુ પઞ્ચીકૃતાનિ ॥ ૯૮॥

પઞ્ચીકરણં ત્વાકાશાદિપઞ્ચસ્વેકૈકં દ્વિધા સમં વિભજ્ય
તેષુ દશસુ ભાગેષુ પ્રાથમિકાન્પઞ્ચભાગાન્પ્રત્યેકં
ચતુર્ધા સમં વિભજ્ય તેષાં ચતુર્ણાં ભાગાનાં
સ્વસ્વદ્વિતીયાર્ધભાગપરિત્યાગેન ભાગાન્તરેષુ યોજનમ્ ॥ ૯૯॥

તદુક્તમ્ -
"દ્વિધા વિધાય ચૈકૈકં ચતુર્ધા પ્રથમં પુનઃ ॥

સ્વસ્વેતરદ્વિતીયાંશૈર્યોજનાત્પઞ્ચ પઞ્ચતે ॥" ઇતિ ॥ ॥ ૧૦૦॥

અસ્યાપ્રામાણ્યં નાશઙ્કનીયં ત્રિવૃત્કરણશ્રુતેઃ

પઞ્ચીકરણસ્યાપ્યુપલક્ષણત્વાત્ ॥ ૧૦૧॥

પઞ્ચાનાં પઞ્ચાત્મકત્વે સમાનેઽપિ તેષુ ચ
“વૈશેષ્યાત્તુ તદ્વાદસ્તદ્વાદઃ” (બ્ર સૂ ૨.૪.૨૨)
ઇતિ ન્યાયેનાકાશાદિવ્યપદેશઃ સમ્ભવતિ ॥ ૧૦૨॥

તદાનીમાકાશે શબ્દોઽભિવ્યજ્યતે વાયૌ શબ્દસ્પર્શાવગ્નૌ
શબ્દસ્પર્શરૂપાણ્યપ્સુ શબ્દસ્પર્શરૂપરસાઃ પૃથિવ્યાં
શબ્દસ્પર્શરૂપરસગન્ધાશ્ચ ॥ ૧૦૩॥

એતેભ્યઃ પઞ્ચીકૃતેભ્યો ભૂતેભ્યો ભૂર્ભુવઃસ્વર્મહર્જનસ્તપઃસત્ય-
મિત્યેતન્નામકાનામુપર્યુપરિવિદ્યમાનાનામતલવિતલસુતલરસાતલ-
તલાતલમહાતલપાતાલનામકાનામધોઽધોવિદ્યમાનાનાં
લોકાનાં બ્રહ્માણ્ડસ્ય તદન્તર્ગતચતુર્વિધસ્થૂલશરીરાણાં
તદુચિતાનામન્નપાનાદીનાં ચોત્પત્તિર્ભવતિ ॥ ૧૦૪॥

ચતુર્વિધશરીરાણિ તુ જરાયુજાણ્ડજસ્વેદજોદ્ભિજ્જાખ્યાનિ ॥ ૧૦૫॥

જરાયુજાનિ જરાયુભ્યો જાતાનિ મનુષ્યપશ્વાદીનિ ॥ ૧૦૬॥

અણ્ડજાન્યણ્ડેભ્યો જાતાનિ પક્ષિપન્નગાદીનિ ॥ ૧૦૭॥

સ્વેદજાનિ સ્વેદેભ્યો જાતાનિ યૂકમશકાદીનિ ॥ ૧૦૮॥

ઉદ્ભિજ્જાનિ ભૂમિમુદ્ભિદ્ય જાતાનિ લતાવૃક્ષાદીનિ ॥ ૧૦૯॥

અત્રાપિ ચતુર્વિધસકલસ્થૂલશરીરમેકાનેકબુદ્ધિવિષયતયા
વનવજ્જલાશયવદ્વા સમષ્ટિર્વૃક્ષવજ્જલવદ્વા વ્યષ્ટિરપિ ભવતિ ॥ ૧૧૦॥

એતત્સમષ્ટ્યુપહિતં ચૈતન્યં વૈશ્વાનરો વિરાડિત્યુચ્યતે
સર્વનરાભિમાનિત્વાદ્વિવિધં રાજમાનત્વાચ્ચ ॥ ૧૧૧॥

અસ્યૈષા સમષ્ટિઃ સ્થૂલશરીરમન્નવિકારત્વાદન્નમયકોશઃ
સ્થૂલભોગાયતનત્વાચ્ચ સ્થૂલશરીરં જાગ્રદિતિ ચ વ્યપદિશ્યતે ॥ ૧૧૨॥

એતદ્વ્યષ્ટ્યુપહિતં ચૈતન્યં વિશ્વ ઇત્યુચ્યતે સૂક્ષ્મશરીરાભિમાનમપરિત્યજ્ય
સ્થૂલશરીરાદિપ્રવિષ્ટત્વાત્ ॥ ૧૧૩॥

અસ્યાપ્યેષા વ્યષ્ટિઃ સ્થૂલશરીરમન્નવિકારત્વાદેવ
હેતોરન્નમયકોશો જાગ્રદિતિ ચોચ્યતે ॥ ૧૧૪॥

તદાનીમેતૌ વિશ્વવૈશ્વાનરૌ દિગ્વાતાર્કવરુણાશ્વિભિઃ
ક્રમાન્નિયન્ત્રિતેન શ્રોત્રાદીન્દ્રિયપઞ્ચકેન
ક્રમાચ્છબ્દસ્પર્શરૂપરસગન્ધાનગ્નીન્દ્રોપેન્દ્રયમપ્રજાપતિભિઃ
ક્રમાન્નિયન્ત્રિતેન વાગાદીન્દ્રિયપઞ્ચકેન
ક્રમાદ્વચનાદાનગમનવિસર્ગાનન્દાંશ્ચન્દ્રચતુર્મુખશઙ્કરાચ્યુતૈઃ
ક્રમાન્નિયન્ત્રિતેન મનોબુદ્ધ્યહઙ્કારચિત્તાખ્યેનાન્તરેન્દ્રિયચતુષ્કેણ
ક્રમાત્સઙ્કલ્પનિશ્ચયાહઙ્કાર્યચૈત્તાંશ્ચ સર્વાનેતાન્
સ્થૂલવિષયાનનુભવતઃ "જાગરિતસ્થાનો બહિઃપ્રજ્ઞઃ" (માણ્ડૂ ઉ ૩)
ઇત્યાદિશ્રુતેઃ ॥ ૧૧૫॥

અત્રાપ્યનયોઃ સ્થૂલવ્યષ્ટિસમષ્ટ્યોસ્તદુપહિતવિશ્વવૈશ્વાનરયોશ્ચ
વનવૃક્ષવત્તદવચ્છિન્નાકાશવચ્ચ જલાશયજલવત્તદ્ગતપ્રતિબિમ્બાકાશવચ્ચ
પૂર્વવદભેદઃ ॥ ૧૧૬॥

એવં પઞ્ચીકૃતપઞ્ચભૂતેભ્યઃ સ્થૂલપ્રપઞ્ચોત્પત્તિઃ ॥ ૧૧૭॥

એતેષાં સ્થૂલસૂક્ષ્મકારણપ્રપઞ્ચાનામપિ સમષ્ટિરેકો
મહાન્પ્રપઞ્ચો ભવતિ યથાવાન્તરવનાનાં સમષ્ટિરેકં મહદ્વનં ભવતિ
યથા વાવાન્તરજલાશયાનાં સમષ્ટિરેકો મહાન્ જલાશયઃ ॥ ૧૧૮॥

એતદુપહિતં વૈશ્વાનરાદીશ્વરપર્યન્તં ચૈતન્યમપ્યવાન્તરવનાવચ્છિન્નાકાશવદવાન્તર
જલાશયગતપ્રતિબિમ્બાકાશવચ્ચૈકમેવ ॥ ૧૧૯॥

આભ્યાં મહાપ્રપઞ્ચતદુપહિતચૈતન્યાભ્યાં તપ્તાયપિણ્ડવદવિવિક્તં
સદનુપહિતં ચૈતન્યં "સર્વં ખલ્વિદં બ્રહ્મ" (છાન્દ ઉ ૩.૧૪.૧)
ઇતિ (મહા) વાક્યસ્ય વાચ્યં ભવતિ વિવિક્તં સલ્લક્ષ્યમપિ ભવતિ ॥ ૧૨૦॥

એવં વસ્તુન્યવસ્ત્વારોપોઽધ્યારોપઃ સામાન્યેન પ્રદર્શિતઃ ॥ ૧૨૧॥

---

૩

ઇદાનીં પ્રત્યગાત્મનીદમિદમયમયમારોપયતીતિ વિશેષત ઉચ્યતે ॥ ૧૨૨॥

અતિપ્રાકૃતસ્તુ "આત્મા વૈ જાયતે પુત્રઃ" ઇત્યાદિશ્રુતેઃ સ્વસ્મિન્નિવ
પુત્રેઽપિ પ્રેમદર્શનાત્પુત્રે પુષ્ટે નષ્ટે ચાહમેવ પુષ્ટો નષ્ટશ્ચેત્યાદ્યનુભવાચ્ચ
પુત્ર આત્મેતિ વદતિ ॥ ૧૨૩॥

ચાર્વાકસ્તુ "સ વા એષ પુરુષોઽન્નરસમયઃ" (તૈ ઉ ૨.૧.૧) ઇત્યાદિશ્રુતેઃ

પ્રદીપ્તગૃહાત્સ્વપુત્રં પરિત્યજ્યાપિ સ્વસ્ય નિર્ગમદર્શનાત્સ્થૂલોઽહં
કૃશોઽહમિત્યાદ્યનુભવાચ્ચ સ્થૂલશરીરમાત્મેતિ વદતિ ॥ ૧૨૪॥

અપરશ્ચાર્વાકઃ “તે હ પ્રાણાઃ પ્રજાપતિં પિતરમેત્યોચુઃ” (છા ઉ ૫.૧.૭)
ઇત્યાદિશ્રુતેરિન્દ્રિયાણામભાવે શરીરચલનાભાવાત્કાણોઽહં
બધિરોઽહમિત્યાદ્યનુભવાચ્ચેન્દ્રિયાણ્યાત્મેતિ વદતિ ॥ ૧૨૫॥

અપરશ્ચાર્વાકઃ “અન્યોઽન્તર આત્મા પ્રાણમયઃ” (તૈ ઉ ૨.૨.૧)
ઇત્યાદિશ્રુતેઃ પ્રાણાભાવ ઇન્દ્રિયાદિચલનાયોગાદહમશનાયાવાનહં
પિપાસાવાનિત્યાદિ અનુભવાચ્ચ પ્રાણ આત્મેતિ વદતિ ॥ ૧૨૬॥

અન્યસ્તુ ચાર્વાકઃ “અન્યોઽન્તર આત્મા મનોમયઃ” (તૈ ઉ ૨.૩.૧)
ઇત્યાદિશ્રુતેર્મનસિ સુપ્તે પ્રાણાદેરભાવાદહં સઙ્કલ્પવાનહં
વિકલ્પવાનિત્યાદ્યનુભવાચ્ચ મન આત્મેતિ વદતિ ॥ ૧૨૭॥

બૌદ્ધસ્તુ “અન્યોઽન્તર આત્મા વિજ્ઞાનમયઃ” (તૈ ઉ ૨.૪.૧)
ઇત્યાદિશ્રુતેઃ કર્તુરભાવે કરણસ્ય શક્ત્યભાવાદહં કર્તાહં ભોક્તેત્યાદ્યનુભવાચ્ચ
બુદ્ધિરાત્મેતિ વદતિ ॥ ૧૨૮॥

પ્રાભાકરતાર્કિકૌ તુ “અન્યોઽન્તર આત્માનન્દમયઃ” (તૈ ઉ ૨.૫.૧)
ઇત્યાદિશ્રુતેર્બુદ્ધ્યાદીનામજ્ઞાને લયદર્શનાદહમજ્ઞોઽહમજ્ઞાનીત્યાદ્યનુભવાચ્ચાજ્ઞાનમાત્મેતિ વદતઃ ॥ ૧૨૯॥

ભાટ્ટસ્તુ “પ્રજ્ઞાનઘન એવાનન્દમયઃ” (માણ્ડૂ ઉ ૫) ઇત્યાદિશ્રુતેઃ સુષુપ્તૌ
પ્રકાશાપ્રકાશસદ્ભાવાન્મામહં ન જાનામીત્યાદ્યનુભવાચ્ચાજ્ઞાનોપહિતં
ચૈતન્યમાત્મેતિ વદતિ ॥ ૧૩૦॥

અપરો બૌદ્ધઃ “અસદેવેદમગ્ર આસીત્” (છા ઉ ૬.૨.૧)
ઇત્યાદિશ્રુતેઃ સુષુપ્તૌ સર્વાભાવાદહં સુષુપ્તૌ નાસમિત્યુત્થિતસ્ય
સ્વાભાવપરામર્શવિષયાનુભવાચ્ચ શૂન્યમાત્મેતિ વદતિ ॥ ૧૩૧॥

એતેષાં પુત્રાદીનામનાત્મત્વમુચ્યતે ॥ ૧૩૨॥

એતૈરતિપ્રાકૃતાદિવાદિભિરુક્તેષુ શ્રુતિયુક્ત્યનુભવાભાસેષુ
પૂર્વપૂર્વોક્તશ્રુતિયુક્ત્યનુભવાભાસાનામુત્તરોત્તરશ્રુતિયુક્ત્યનુભવાભાસૈ-
રાત્મત્વબાધદર્શનાત્પુત્રાદીનામનાત્મત્વં સ્પષ્ટમેવ ॥ ૧૩૩॥

કિઞ્ચ પ્રત્યગસ્થૂલોઽચક્ષુરપ્રાણોઽમના અકર્તા ચૈતન્યં ચિન્માત્રં
સદિત્યાદિપ્રબલશ્રુતિવિરોધાદસ્ય પુત્રાદિશૂન્યપર્યન્તસ્ય જડસ્ય
ચૈતન્યભાસ્યત્વેન ઘટાદિવદનિત્યત્વાદહં બ્રહ્મેતિ

વિદ્વદનુભવપ્રાબલ્યાચ્ચ તત્તચ્છ્રુતિયુક્ત્યનુભવભાસાનાં
બાધિતત્વાદપિ પુત્રાદિશૂન્યપર્યન્તમખિલમનાત્મૈવ ॥ ૧૩૪॥

અતસ્તત્તદ્ભાસકં નિત્યશુદ્ધબુદ્ધમુક્તસત્યસ્વભાવં
પ્રત્યક્ચૈતન્યમેવાત્મવસ્ત્વિતિ વેદાન્તવિદ્વદનુભવઃ ॥ ૧૩૫॥

એવમધ્યારોપઃ ॥ ૧૩૬॥

---

૪

અપવાદો નામ રજ્જુવિવર્તસ્ય સર્પસ્ય રજ્જુમાત્રત્વવદ્વસ્તુવિવર્તસ્યાવસ્તુનોઽજ્ઞાનાદેઃ
પ્રપઞ્ચસ્ય વસ્તુમાત્રત્વમ્ ॥ ૧૩૭॥

તદુક્તમ્ -
“સતત્ત્વતોઽન્યથાપ્રથા વિકાર ઇત્યુદીરિતઃ ।
અતત્ત્વતોઽન્યથાપ્રથા વિવર્ત ઇત્યુદીરિતઃ ॥” ઇતિ ॥ ૧૩૮॥

તથાહિ એતદ્ભોગાયતનં ચતુર્વિધસકલસ્થૂલશરીરજાતં
ભોગ્યરૂપાન્નપાનાદિકમેતદાયતનભૂતભૂરાદિચતુર્દશભુવનાન્યેતદાયતનભૂતં
બ્રહ્માણ્ડં ચૈતત્સર્વમેતેષાં કારણરૂપં પઞ્ચીકૃતભૂતમાત્રં ભવતિ ॥ ૧૩૯॥

એતાનિ શબ્દાદિવિષયસહિતાનિ પઞ્ચીકૃતાનિ ભૂતાનિ સૂક્ષ્મશરીરજાતં
ચૈતત્સર્વમેતેષાં કારણરૂપાપઞ્ચીકૃતભૂતમાત્રં ભવતિ ॥ ૧૪૦॥

એતાનિ સત્ત્વાદિગુણસહિતાન્યપઞ્ચીકૃતાન્યુત્પત્તિ-
વ્યુત્ક્રમેણૈતત્કારણભૂતાજ્ઞાનોપહિતચૈતન્યમાત્રં ભવતિ ॥ ૧૪૧॥

એતદજ્ઞાનમજ્ઞાનોપહિતં ચૈતન્યં ચેશ્વરાદિકમેતદાધાર-
ભૂતાનુપહિતચૈતન્યરૂપં તુરીયં બ્રહ્મમાત્રં ભવતિ ॥ ૧૪૨॥

આભ્યામધ્યારોપાપવાદાભ્યાં તત્ત્વમ્પદાર્થશોધનમપિ
સિદ્ધં ભવતિ ॥ ૧૪૩॥

તથાહિ - અજ્ઞાનાદિસમષ્ટિરેતદુપહિતં સર્વજ્ઞત્વાદિવિશિષ્ટં
ચૈતન્યમેતદનુપહિતં ચૈતત્ત્રયં તપ્તાયઃપિણ્ડવદેકત્વેનાવભાસમાનં
તત્પદવાચ્યાર્થો ભવતિ ॥ ૧૪૪॥

એતદુપાધ્યુપહિતાધારભૂતમનુપહિતં ચૈતન્યં તત્પદલક્ષ્યાર્થો ભવતિ ॥ ૧૪૫॥

અજ્ઞાનાદિવ્યષ્ટિરેતદુપહિતાલ્પજ્ઞત્વાદિવિશિષ્ટચૈતન્યમેત-

દનુપહિતં ચૈતત્ત્રયં તપ્તાયઃપિણ્ડવદેકત્વેનાવભાસમાનં
ત્વમ્પદવાચ્યાર્થો ભવતિ ॥ ૧૪૬॥

એતદુપાધ્યુપહિતાધારભૂતમનુપહિતં પ્રત્યગાનન્દં
તુરીયં ચૈતન્યં ત્વમ્પદલક્ષ્યાર્થો ભવતિ ॥ ૧૪૭॥

અથ મહાવાક્યાર્થો વર્ણ્યતે । ઇદં તત્ત્વમસિવાક્યં
સમ્બન્ધત્રયેણાખણ્ડાર્થબોધકં ભવતિ ॥ ૧૪૮॥

સમ્બન્ધત્રયં નામ પદયોઃ સામાનાધિકરણ્યં
પદાર્થયોર્વિશેષણવિશેષ્યભાવઃ પ્રત્યગાત્મ-
લક્ષણયોર્લક્ષ્યલક્ષણભાવશ્ચેતિ ॥ ૧૪૯॥

તદુક્તમ્ -
"સામાનાધિકરણ્યં ચ વિશેષણવિશેષ્યતા ।
લક્ષ્યલક્ષણસમ્બન્ધઃ પદાર્થપ્રત્યગાત્મનામ્ ॥" ઇતિ ॥ ૧૫૦॥

સામાનાધિકરણ્યસમ્બન્ધસ્તાવદ્યથા સોઽયં દેવદત્ત ઇત્યસ્મિન્વાક્યે
તત્કાલવિશિષ્ટદેવદત્તવાચકસશબ્દસ્યૈતત્કાલવિશિષ્ટદેવદત્ત-
વાચકાયંશબ્દસ્ય ચૈકસ્મિન્પિણ્ડે તાત્પર્યસમ્બન્ધઃ । તથા ચ
તત્ત્વમસીતિ વાક્યેઽપિ પરોક્ષત્વાદિવિશિષ્ટચૈતન્યવાચકતત્પદ-
સ્યાપરોક્ષત્વાદિ વિશિષ્ટચૈતન્યવાચકત્વમ્પદસ્ય ચૈકસ્મિંશ્ચૈતન્યે
તાત્પર્યસમ્બન્ધઃ ॥ ૧૫૧॥

વિશેષણવિશેષ્યભાવસમ્બન્ધસ્તુ યથા તત્રૈવ વાક્યે
સશબ્દાર્થતત્કાલવિશિષ્ટદેવદત્તસ્યાયંશબ્દાર્થૈતત્કાલવિશિષ્ટદેવદત્તસ્ય
ચાન્યોન્યભેદવ્યાવર્તકતયા વિશેષણવિશેષ્યભાવઃ । તથાત્રાપિ વાક્યે
તત્પદાર્થપરોક્ષત્વાદિવિશિષ્ટચૈતન્યસ્ય ત્વમ્પદાર્થાપરોક્ષત્વાદિવિશિષ્ટચૈતન્યસ્ય
ચાન્યોન્યભેદવ્યાવર્તકતયા વિશેષણવિશેષ્યભાવઃ ॥ ૧૫૨॥

લક્ષ્યલક્ષણસમ્બન્ધસ્તુ યથા તત્રૈવ સશબ્દાયંશબ્દયોસ્તદર્થયોર્વા
વિરુદ્ધતત્કાલૈતત્કાલવિશિષ્ટત્વપરિત્યાગેનાવિરુદ્ધદેવદત્તેન સહ લક્ષ્યલક્ષણભાવઃ ।
તથાત્રાપિ વાક્યે તત્ત્વમ્પદયોસ્તદર્થયોર્વા વિરુદ્ધપરોક્ષત્વાપરોક્ષત્વાદિ-
વિશિષ્ટત્વપરિત્યાગેનાવિરુદ્ધચૈતન્યેન સહ લક્ષ્યલક્ષણભાવઃ ॥ ૧૫૩॥

ઇયમેવ ભાગલક્ષણેત્યુચ્યતે ॥ ૧૫૪॥

અસ્મિન્વાક્યે નીલમુત્પલમિતિ વાક્યવદ્વાક્યાર્થો ન સઙ્ગચ્છતે ॥ ૧૫૫॥

તત્ર તુ નીલપદાર્થનીલગુણસ્યોત્પલપદાર્થોત્પલદ્રવ્યસ્ય ચ
શૌક્લ્યપટાદિભેદવ્યાવર્તકતયાન્યોન્યવિશેષણવિશેષ્ય-
રૂપસંસર્ગસ્યાન્યતરવિશિષ્ટસ્યાન્યતરસ્ય તદૈક્યસ્ય વા
વાક્યાર્થત્વાઙ્ગીકારે પ્રમાણાન્તરવિરોધાભાવાત્તદ્વાક્યાર્થઃ
સઙ્ગચ્છતે ॥ ૧૫૬॥

અત્ર તુ તત્પદાર્થપરોક્ષત્વાદિવિશિષ્ટચૈતન્યસ્ય
ત્વમ્પદાર્થાપરોક્ષત્વાદિવિશિષ્ટચૈતન્યસ્ય ચાન્યોન્યભેદવ્યાવર્તકતયા
વિશેષણવિશેષ્યભાવસંસર્ગસ્યાન્યતરવિશિષ્ટસ્યાન્યતરસ્ય
તદૈક્યસ્ય વા વાક્યાર્થત્વાઙ્ગીકારે પ્રત્યક્ષાદિપ્રમાણવિરોધાદ્વાક્યાર્થો
ન સઙ્ગચ્છતે ॥ ૧૫૭॥

તદુક્તમ્ -
“સંસર્ગો વા વિશિષ્ટો વા વાક્યાર્થો નાત્ર સમ્મતઃ ।
અખણ્ડૈકરસત્વેન વાક્યાર્થો વિદુષાં મતઃ ॥” ઇતિ (પઞ્ચદશી ૭.૭૫) ॥ ૧૫૮॥

અત્ર ગઙ્ગાયાં ઘોષઃ પ્રતિવસતીતિવાક્યવજ્જહલ્લક્ષણાપિ ન સઙ્ગચ્છતે ॥ ૧૫૯॥

તત્ર તુ ગઙ્ગાઘોષયોરાધારાધેયભાવલક્ષણસ્ય વાક્યાર્થસ્યાશેષતો
વિરુદ્ધત્વાદ્વાક્યાર્થમશેષતઃ પરિત્યજ્ય તત્સમ્બન્ધિતીરલક્ષણાયા
યુક્તત્વાજ્જહલ્લક્ષણા સઙ્ગચ્છતે ॥ ૧૬૦॥

અત્ર તુ પરોક્ષાપરોક્ષચૈતન્યૈકત્વલક્ષણસ્ય
વાક્યાર્થસ્ય ભાગમાત્રે વિરોધાદ્ભાગાન્તરમપિ
પરિત્યજ્યાન્યલક્ષણાયા અયુક્તત્વાજ્જહલ્લક્ષણા
ન સઙ્ગચ્છતે ॥ ૧૬૧॥

ન ચ ગઙ્ગાપદં સ્વાર્થપરિત્યાગેન તીરપદાર્થં
યથા લક્ષયતિ તથા તત્પદં ત્વમ્પદં વા
સ્વાર્થપરિત્યાગેન ત્વમ્પદાર્થં તત્પદાર્થં વા
લક્ષયત્વતઃ કુતો જહલ્લક્ષણા ન સઙ્ગચ્છત
ઇતિ વાચ્યમ્ ॥ ૧૬૨॥

તત્ર તીરપદાશ્રવણેન તદર્થાપ્રતીતૌ લક્ષણયા
તત્પ્રતીત્યપેક્ષાયામપિ તત્ત્વમ્પદયોઃ શ્રૂયમાણત્વેન
તદર્થપ્રતીતૌ લક્ષણયા પુનરન્યતરપદેનાન્યતર-
પદાર્થપ્રતીત્યપેક્ષાભાવાત્ ॥ ૧૬૩॥

અત્ર શોણો ધાવતીતિવાક્યવદજહલ્લક્ષણાપિ ન સમ્ભવતિ ॥ ૧૬૪॥

તત્ર શોણગુણગમનલક્ષણસ્ય વાક્યાર્થસ્ય
વિરુદ્ધત્વાત્તદપરિત્યાગેન તદાશ્રયાશ્વાદિલક્ષણયા
તદ્વિરોધપરિહારસમ્ભવાદજહલ્લક્ષણા સમ્ભવતિ ॥ ૧૬૫॥

અત્ર તુ પરોક્ષત્વાપરોક્ષત્વાદિવિશિષ્ટચૈતન્યૈકત્વસ્ય
વાક્યાર્થસ્ય વિરુદ્ધત્વાત્તદપરિત્યાગેન તત્સમ્બન્ધિનો યસ્ય
કસ્યચિદર્થસ્ય લક્ષિતત્વેઽપિ તદ્વિરોધપરિહારાસમ્ભવા-
દજહલ્લક્ષણા ન સમ્ભવત્યેવ ॥ ૧૬૬॥

ન ચ તત્પદં ત્વમ્પદં વા સ્વાર્થવિરુદ્ધાંશપરિત્યાગેનાં-
શાન્તરસહિતં ત્વમ્પદાર્થં તત્પદાર્થં વા લક્ષયત્વતઃ
કથં પ્રકારાન્તરેણ ભાગલક્ષણાઙ્ગીકરણમિતિ વાચ્યમ્ ॥ ૧૬૭॥

એકેન પદેન સ્વાર્થાંશપદાર્થાન્તરોભયલક્ષણાયા
અસમ્ભવાત્પદાન્તરેણ તદર્થપ્રતીતૌ લક્ષણયા
પુનસ્તત્પ્રતીત્યપેક્ષાભાવાચ્ચ ॥ ૧૬૮॥

તસ્માદ્યથા સોઽયં દેવદત્ત ઇતિ વાક્યં તદર્થો વા
તત્કાલૈતત્કાલવિશિષ્ટદેવદત્તલક્ષણસ્ય વાક્યાર્થસ્યાંશે
વિરોધાદ્વિરુદ્ધતત્કાલૈતત્કાલવિશિષ્ટાંશં પરિત્યજ્યાવિરુદ્ધં
દેવદત્તાંશમાત્રં લક્ષયતિ તથા તત્ત્વમસીતિવાક્યં તદર્થો વા
પરોક્ષત્વાપરોક્ષત્વાદિવિશિષ્ટચૈતન્યૈકત્વલક્ષણસ્ય
વાક્યાર્થસ્યાંશે વિરોધાદ્વિરુદ્ધપરોક્ષત્વાપરોક્ષત્વવિશિષ્ટાંશં
પરિત્યજ્યાવિરુદ્ધમખણ્ડચૈતન્યમાત્રં લક્ષયતીતિ ॥ ૧૬૯॥

અથાધુનાહં બ્રહ્માસ્મિ (બૃ ઉ ૧.૪.૧૦)
ઇત્યનુભવવાક્યાર્થો વર્ણ્યતે ॥ ૧૭૦॥

એવમાચાર્યેણાધ્યારોપાપવાદપુરઃસરં તત્ત્વમ્પદાર્થૌ
શોધયિત્વા વાક્યેનાખણ્ડાર્થેઽવબોધિતેઽધિકારિણોઽહં
નિત્યશુદ્ધબુદ્ધમુક્તસત્યસ્વભાવપરમાનન્દાનન્તાદ્વયં
બ્રહ્માસ્મીત્યખણ્ડાકારાકારિતા ચિત્તવૃત્તિરુદેતિ ॥ ૧૭૧॥

સા તુ ચિત્પ્રતિબિમ્બસહિતા સતી પ્રત્યગભિન્નમજ્ઞાતં પરમ્બ્રહ્મ

વિષયીકૃત્ય તદ્ગતાજ્ઞાનમેવ બાધતે તદા પટકારણતન્તુદાહે
પટદાહવદખિલકારણેઽજ્ઞાને બાધિતે સતિ તત્કાર્યસ્યાખિલસ્ય
બાધિતત્વાત્તદન્તર્ભૂતાખણ્ડાકારાકારિતા ચિત્તવૃત્તિરપિ બાધિતા ભવતિ ॥ ૧૭૨॥

તત્ર પ્રતિબિમ્બિતં ચૈતન્યમપિ યથા દીપપ્રભાદિત્યપ્રભાવભાસનાસમર્થા
સતી તયાભિભૂતા ભવતિ તથા સ્વયમ્પ્રકાશમાનપ્રત્યગભિન્નપરબ્રહ્માવભાસનાનર્હતયા
તેનાભિભૂતં સત્ સ્વોપાધિભૂતાખણ્ડવૃત્તેર્બાધિતત્વાદ્દર્પણાભાવે
મુખપ્રતિબિમ્બસ્ય મુખમાત્રત્વવત્પ્રત્યગભિન્નપરબ્રહ્મમાત્રં ભવતિ ॥ ૧૭૩॥

એવં ચ સતિ “મનસૈવાનુદ્રષ્ટવ્યમ્” (બૃ ઉ ૪.૪.૧૯)
“યન્મનસા ન મનુતે”
(કે ઉ ૧.૫) ઇત્યનયોઃ શ્રુત્યોરવિરોધો વૃત્તિવ્યાપ્યત્વાઙ્ગીકારેણ
ફલવ્યાપ્યત્વપ્રતિષેધપ્રતિપાદનાત્ ॥ ૧૭૪॥

તદુક્તમ્ -
“ફલવ્યાપ્યત્વમેવાસ્ય શાસ્ત્રકૃદ્ભિર્નિવારિતમ્ ।
બ્રહ્મણ્યજ્ઞાનનાશાય વૃત્તિવ્યાપ્તિરપેક્ષિતા ॥” ઇતિ (પઞ્ચદશી ૬.૯૦) ॥ ૧૭૫॥

“સ્વયમ્પ્રકાશમાનત્વાન્નાભાસ ઉપયુજ્યતે ।” ઇતિ ચ (પઞ્ચદશી ૬.૯૨) ॥ ૧૭૬॥

જડપદાર્થાકારાકારિતચિત્તવૃત્તેર્વિશેષોઽસ્તિ ॥ ૧૭૭॥

તથાહિ । અયં ઘટ ઇતિ ઘટાકારાકારિતચિત્તવૃત્તિરજ્ઞાતં ઘટં
વિષયીકૃત્ય તદ્ગતાજ્ઞાનનિરસનપુરઃસરં સ્વગતચિદાભાસેન
જડં ઘટમપિ ભાસયતિ ॥ ૧૭૮॥

તદુક્તં -
“બુદ્ધિતત્સ્થચિદાભાસૌ દ્વાવપિ વ્યાપ્નુતો ઘટમ્ ।
તત્રાજ્ઞાનં ધિયા નશ્યેદાભાસેન ઘટઃ સ્ફુરેત્ ॥” ઇતિ । (પઞ્ચદશી ૭.૯૧) ॥ ૧૭૯॥

યથા દીપપ્રભામણ્ડલમન્ધકારગતં ઘટપટાદિકં વિષયીકૃત્ય
તદ્ગતાન્ધકારનિરસનપુરઃસરં સ્વપ્રભયા તદપિ ભાસયતીતિ ॥ ૧૮૦॥

---

૫

એવં ભૂતસ્વસ્વરૂપચૈતન્યસાક્ષાત્કારપર્યન્તં શ્રવણમનન-
નિદિધ્યાસનસમાધ્યનુષ્ઠાનસ્યાપેક્ષિતત્વાત્તેઽપિ પ્રદર્શ્યન્તે ॥ ૧૮૧॥

શ્રવણં નામ ષડ્વિધલિઙ્ગૈરશેષવેદાન્તાનામદ્વિતીયવસ્તુનિ

તાત્પર્યાવધારણમ્ ॥ ૧૮૨॥

લિઙ્ગાનિ તૂપક્રમોપસંહારાભ્યાસાપૂર્વતાફલાર્થવાદોપપત્ત્યાખ્યાનિ ॥ ૧૮૩॥

તદુક્તમ્ -
“ઉપક્રમોપસંહારાવભ્યાસોઽપૂર્વતાફલમ્ ।
અર્થવાદોપપત્તી ચ લિઙ્ગં તાત્પર્યનિર્ણયે ॥” ॥ ૧૮૪॥

પ્રકરણપ્રતિપાદ્યસ્યાર્થસ્ય તદાદ્યન્તયોરુપપાદનમુપક્રમોપસંહારૌ ।
યથા છાન્દોગ્યે ષષ્ઠાધ્યાયે પ્રકરણપ્રતિપાદ્યસ્યાદ્વિતીયવસ્તુન
“એકમેવાદ્વિતીયમ્” (૬.૨.૧) ઇત્યાદૌ “ઐતદાત્મ્યમિદં સર્વમ્” (૬.૮.૭)
ઇત્યન્તે ચ પ્રતિપાદનમ્ ॥ ૧૮૫॥

પ્રકરણપ્રતિપાદ્યસ્ય વસ્તુનસ્તન્મધ્યે પૌનઃપુન્યેન
પ્રતિપાદનમભ્યાસઃ । યથા તત્રૈવાદ્વિતીયવસ્તુનિ મધ્યે
તત્ત્વમસીતિ નવકૃત્વઃ પ્રતિપાદનમ્ ॥ ૧૮૬॥

પ્રકરણપ્રતિપાદ્યસ્યાદ્વિતીયવસ્તુનઃ પ્રમાણાન્તરા-
વિષયીકરણમપૂર્વતા । યથા તત્રૈવાદ્વિતીયવસ્તુનો
માનાન્તરાવિષયીકરણમ્ ॥ ૧૮૭॥

ફલં તુ પ્રકરણપ્રતિપાદ્યસ્યાત્મજ્ઞાનસ્ય તદનુષ્ઠાનસ્ય
વા તત્ર તત્ર શ્રૂયમાણં પ્રયોજનમ્ । યથા તત્ર “આચાર્યવાન્પુરુષો
વેદ તસ્ય તાવદેવ ચિરં યાવન્ન વિમોક્ષ્યેથ સમ્પત્સ્યે” (૬.૧૪.૨)
ઇત્યદ્વિતીયવસ્તુજ્ઞાનસ્ય તત્પ્રાપ્તિઃ પ્રયોજનં શ્રૂયતે ॥ ૧૮૮॥

પ્રકરણપ્રતિપાદ્યસ્ય તત્ર તત્ર પ્રશંસનમર્થવાદઃ ।
યથા તત્રૈવ “ઉત તમાદેશમપ્રાક્ષ્યો યેનાશ્રુતં શ્રુતં ભવત્યમતં
મતમવિજ્ઞાતં વિજ્ઞાતમ્” (૬.૧.૩) ઇત્યદ્વિતીયવસ્તુપ્રશંસનમ્ ॥ ૧૮૯॥

પ્રકરણપ્રતિપાદ્યાર્થસાધને તત્ર તત્ર શ્રુયમાણા યુક્તિરુપપત્તિઃ । યથા
તત્ર “યથા સૌમ્યૈકેન મૃત્પિણ્ડેન સર્વં મૃન્મયં વિજ્ઞાતં
સ્યાદ્વાચારમ્ભણં વિકારો નામધેયં મૃત્તિકેત્યેવ સત્યમ્” (૬.૧.૪)
ઇત્યાદાવદ્વિતીયવસ્તુસાધને વિકારસ્ય વાચારમ્ભણમાત્રત્વે યુક્તિઃ શ્રૂયતે ॥ ૧૯૦॥

મનનં તુ શ્રુતસ્યાદ્વિતીયવસ્તુનો વેદાન્તાનુગુણયુક્તિભિરનવરતમનુચિન્તનમ્ ॥ ૧૯૧॥

વિજાતીયદેહાદિપ્રત્યયરહિતાદ્વિતીયવસ્તુસજાતીયપ્રત્યયપ્રવાહો નિદિધ્યાસનમ્ ॥ ૧૯૨॥

સમાધિર્દ્વિવિધઃ સવિકલ્પકો નિર્વિકલ્પશ્ચેતિ ॥ ૧૯૩॥

તત્ર સવિકલ્પકો નામ જ્ઞાતૃજ્ઞાનાદિવિકલ્પલયાનપેક્ષયાદ્વિતીયવસ્તુનિ
તદાકારાકારિતાયાશ્ચિત્તવૃત્તેરવસ્થાનમ્ ॥ ૧૯૪॥

તદા મૃણ્મયગજાદિભાનેઽપિ મૃદ્ભાનવદ્વૈતભાનેઽપ્યદ્વૈતં વસ્તુ ભાસતે ॥ ૧૯૫॥

તદુક્તમ્ -
"દૃશિસ્વરૂપં ગગનોપમં પરમ્
 સકૃદ્વિભાતં ત્વજમેકમક્ષરમ્ ।
અલેપકં સર્વગતં યદદ્વયમ્
તદેવ ચાહં સતતં વિમુક્તમોમ્ ॥" ઇતિ
(ઉપદેશસાહસ્રી ૭૩.૧૦.૧) ॥ ૧૯૬॥

નિર્વિકલ્પકસ્તુ જ્ઞાતૃજ્ઞાનાદિવિકલ્પલયાપેક્ષયાદ્વિતીયવસ્તુનિ
તદાકારાકારિતાયાશ્ચિત્તવૃત્તેરતિતરામેકીભાવેનાવસ્થાનમ્ ॥ ૧૯૭॥

તદા તુ જલાકારાકારિતલવણાનવભાસેન જલમાત્રાવભાસવદદ્વિતીય-
વસ્ત્વાકારાકારિતચિત્તવૃત્ત્યનવભાસેનાદ્વિતીયવસ્તુમાત્રમવભાસતે ॥ ૧૯૮॥

તતશ્ચાસ્ય સુષુપ્તેશ્ચાભેદશઙ્કા ન ભવતિ । ઉભયત્ર વૃત્ત્યભાને
સમાનેઽપિ તત્સદ્ભાવાસદ્ભાવમાત્રેણાનયોર્ભેદોપપત્તેઃ ॥ ૧૯૯॥

અસ્યાઙ્ગાનિ યમનિયમાસનપ્રાણાયામપ્રત્યાહારધારણાધ્યાનસમાધયઃ ॥ ૨૦૦॥

તત્ર "અહિંસાસત્યાસ્તેયબ્રહ્મચર્યાપરિગ્રહા યમાઃ" ॥ ૨૦૧॥

"શૌચસન્તોષતપઃસ્વાધ્યાયેશ્વરપ્રણિધાનાનિ નિયમાઃ" ॥૨૦૨॥

કરચરણાદિસંસ્થાનવિશેષલક્ષણાનિ પદ્મસ્વસ્તિકાદીન્યાસનાનિ ॥ ૨૦૩॥

રેચકપૂરકકુમ્ભકલક્ષણાઃ પ્રાણનિગ્રહોપાયાઃ પ્રાણાયામાઃ ॥ ૨૦૪॥

ઇન્દ્રિયાણાં સ્વસ્વવિષયેભ્યઃ પ્રત્યાહરણં પ્રત્યાહારઃ ॥ ૨૦૫॥

અદ્વિતીયવસ્તુન્યન્તરિન્દ્રિયધારણં ધારણા ॥ ૨૦૬.।

તત્રાદ્વિતીયવસ્તુનિ વિચ્છિદ્ય વિચ્છિદ્યાન્તરિન્દ્રિયવૃત્તિપ્રવાહો ધ્યાનમ્ ॥ ૨૦૭॥

સમાધિસ્તૂક્તઃ સવિકલ્પક એવ ॥ ૨૦૮॥

એવમસ્યાઙ્ગિનો નિર્વિકલ્પકસ્ય લયવિક્ષેપકષાયરસાસ્વાદલક્ષણાશ્ચત્વારો
વિઘ્નાઃ સમ્ભવન્તિ ॥ ૨૦૯॥

લયસ્તાવદખણ્ડવસ્તનવલમ્બનેન ચિત્તવૃત્તેર્નિદ્રા ॥ ૨૧૦॥

અખણ્ડવસ્ત્વનવલમ્બનેન ચિત્તવૃત્તેરન્યાવલમ્બનં વિક્ષેપઃ ॥ ૨૧૧॥

લયવિક્ષેપાભાવેઽપિ ચિત્તવૃત્તેર્રાગાદિવાસનયા
સ્તબ્ધીભાવાદખણ્ડવસ્ત્વનવલમ્બનં કષાયઃ ॥ ૨૧૨॥

અખણ્ડવસ્ત્વનવલમ્બનેનાપિ ચિત્તવૃત્તેઃ સવિકલ્પકાનન્દાસ્વાદનં
રસાસ્વાદઃ । સમાધ્યારમ્ભસમયે સવિકલ્પકાનન્દાસ્વાદનં વા ॥ ૨૧૩॥

અનેન વિઘ્નચતુષ્ટયેન વિરહિતં ચિત્તં નિર્વાતદીપવદચલં
સદખણ્ડચૈતન્યમાત્રમવતિષ્ઠતે યદા તદા નિર્વિકલ્પકઃ
સમાધિરિત્યુચ્યતે ॥ ૨૧૪॥

યદુક્તમ્ -
“લયે સમ્બોધયેચ્ચિતં વિક્ષિપ્તં શમયેત્પુનઃ ।
સકષાયં વિજાનીયાત્સમપ્રાપ્તં ન ચાલયેત્ ॥

નાસ્વાદયેદ્રસં તત્ર નિઃસઙ્ગઃ પ્રજ્ઞયા ભવેત્” ઇતિ ચ
(ગૌડપાદકારિકા ૩.૪૪-૪૫)
“યથા દીપો નિવાતસ્થો નેઙ્ગતે સોપમા સ્મૃતા” ઇતિ ચ
(ગીતા ૬ - ૧૯) ॥ ૨૧૫॥

---

૬
અથ જીવન્મુક્તલક્ષણમુચ્યતે ॥ ૨૧૬॥

જીવન્મુક્તો નામ સ્વસ્વરૂપાખણ્ડબ્રહ્મજ્ઞાનેન
તદજ્ઞાનબાધનદ્વારા સ્વસ્વરૂપાખણ્ડબ્રહ્મણિ
સાક્ષાત્કૃતેઽજ્ઞાનતત્કાર્યસઞ્ચિતકર્મસંશયવિપર્યયાદીનામપિ
બાધિતત્વાદખિલબન્ધરહિતો બ્રહ્મનિષ્ઠઃ ॥ ૨૧૭॥

“ભિદ્યતે હૃદયગ્રન્થિશ્છિદ્યન્તે સર્વસંશયાઃ ।
ક્ષીયન્તે ચાસ્ય કર્માણિ તસ્મિન્દૃષ્ટે પરાવરે ॥”
ઇત્યાદિશ્રુતેઃ (મુણ્ડ ઉ ૨.૨.૮) ॥ ૨૧૮॥

અયં તુ વ્યુત્થાનસમયે માંસશોણિતમૂત્રપુરીષાદિભાજનેન
શરીરેણાન્ધ્યમાન્દ્યાપટુત્વાદિભાજનેનેન્દ્રિયગ્રામેણાશના-

પિપાસાશોકમોહાદિભાજનેનાન્તઃકરણેન ચ પૂર્વપૂર્વવાસનયા ક્રિયમાણાનિ કર્માણિ ભુજ્યમાનાનિ જ્ઞાનાવિરુદ્ધારબ્ધફલાનિ ચ પશ્યન્નપિ બાધિતત્વાત્પરમાર્થતો ન પશ્યતે । યથેન્દ્રજાલમિતિ જ્ઞાનવાંસ્તદિન્દ્રજાલં પશ્યન્નપિ પરમાર્થમિદમિતિ ન પશ્યતિ ॥ ૨૧૯॥

“સચક્ષુરચક્ષુરિવ સકર્ણોઽકર્ણ ઇવ” ઇત્યાદિશ્રુતેઃ ॥ ૨૨૦॥

ઉક્તઞ્ચ -
“સુષુપ્તવજ્જાગ્રતિ યો ન પશ્યતિ
દ્વયં ચ પશ્યન્નપિ ચાદ્વયત્વતઃ ॥

તથા ચ કુર્વન્નપિ નિષ્ક્રિયશ્ચ યઃ
સ આત્મવિન્નાન્ય ઇતીહ નિશ્ચયઃ ॥” ઇતિ (ઉપદેશસાહસ્રી ૫) ॥ ૨૨૧॥

અથ જ્ઞાનાત્પૂર્વં વિદ્યમાનાનામેવાહારવિહારાદીનામનુવૃત્તિવ-
ચ્છુભવાસનાનામેવાનુવૃત્તિર્ભવતિ શુભાશુભયોરૌદાસીન્યં વા ॥ ૨૨૨॥

તદુક્તમ્ । -
“બુદ્ધાદ્વૈતસતત્ત્વસ્ય યથેષ્ટાચરણં યદિ ।
શુનાં તત્ત્વદૃશાઞ્ચૈવ કો ભેદોઽશુચિભક્ષણે ॥ ઇતિ (નૈષ્કર્મ્યસિદ્ધિઃ ૪.૬૨)
“બ્રહ્મવિત્તં તથા મુક્ત્વા સ આત્મજ્ઞો ન ચેતરઃ ॥)” ઇતિ ચ (ઉપદેશસાહસ્રી ૧૧૫) ॥ ૨૨૩॥

તદાનીમમાનિત્વાદીનિ જ્ઞાનસાધનાન્યદ્વેષ્ટૃત્વાદયઃ સદ્ગુણાશ્ચાલઙ્કારવદનુવર્તન્તે ॥ ૨૨૪॥

તદુક્તમ્ -
“ઉત્પન્નાત્માવબોધસ્ય હ્યદ્વેષ્ટૃત્વાદયો ગુણાઃ ।
અયત્નતો ભવન્ત્યસ્ય ન તુ સાધનરૂપિણઃ ॥” ઇતિ (નૈષ્કર્મ્યસિદ્ધિઃ ૪.૬૯) ॥ ૨૨૫॥

કિં બહુનાયં દેહયાત્રામાત્રાર્થમિચ્છાનિચ્છા-
પરેચ્છાપ્રાપિતાનિ સુખદુઃખલક્ષણાન્યારબ્ધ-
ફલાન્યનુભવન્નન્તઃકરણાભાસાદીનામવભાસકઃ
સંસ્તદવસાને પ્રત્યગાનન્દપરબ્રહ્મણિ પ્રાણે લીને
સત્યજ્ઞાનતત્કાર્યસંસ્કારાણામપિ વિનાશાત્પરમકૈવલ્ય-
માનન્દૈકરસમખિલભેદપ્રતિભાસરહિતમખણ્ડબ્રહ્માવતિષ્ઠતે ॥ ૨૨૬॥

“ન તસ્ય પ્રાણા ઉત્ક્રામન્તિ” (બૃ ઉ ૪.૪.૬)
“અત્રૈવ સમવનીયન્તે” (બૃ ઉ ૩.૨.૧૧)
“વિમુક્તશ્ચ વિમુચ્યતે” (કઠ ઉ ૫.૧) ઇત્યાદિશ્રુતેઃ ॥ ૨૨૭॥

ઇતિ સદાનન્દ યોગીન્દ્ર વિરચિતો વેદાન્તસારનામ ગ્રન્થઃ સમાપ્તઃ ।

Encoded and proofread by Sunder Hattangadi

Proofread by Pranipata Chaitanya

*Vedantasara*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*